# आदर्शप्रश्नपत्र- प्रारूपम्

**“2024-2025”**

## कक्षा अष्टमी

## विषयः संस्कृतम्

**समयः -होरात्रयम्** **पूर्णांकाः – 100**

| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | **20 अङ्काः** |
|---|---|---|
| **प्रश्न 1.** | **अधोलिखितानां विंशतिः प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।** | **1×20=20** |
| **1.** | **संस्कृते ............... लिङ्गानि सन्ति।**<br>**(1) त्रयः (2) तिस्रः**<br>**(3) त्रीणि (4) चत्वारि** | |
| **2.** | **रुचिरा (तृतीयो-भागः) इत्यस्य पञ्चमः पाठः कः?**<br>**(1) संसारसागरस्य नायकाः (2) सप्तभगिन्यः**<br>**(3) भारत जनताऽहम् (4) कण्टकेनैव कण्टकम्** | |
| **3.** | **“कंजूस” इत्यस्य कृते संस्कृत-पदं किम्?**<br>**(1) तृणम् (2) कृपण:**<br>**(3) कटुः (4) लुब्धः** | |
| **4.** | **अहम् .................. वस्त्राणि ददामि ।**<br>**(1) निर्धनाय (2) निर्धनात्**<br>**(3) निर्धनस्य (4) निर्धनेन** | |
| **5.** | **“अहं त्वत्कृते धर्मम् आचरितवान्” अत्र “अहम्” इति सर्वनामपदं कस्मै प्रयुक्तम्?**<br>**(1) व्याधाय (2) व्याघ्राय**<br>**(3) शृगालाय (4) वृक्षाय** | |
| **6.** | **अस्माकं देशे कति राज्यानि सन्ति?**<br>**(1) सप्तविंशतिः (2) अष्टाविंशति:**<br>**(3) नवविंशति: (4) त्रिंशत्** | |
| **7.** | **'क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते' अस्मात् वाक्यात् 'सन्ति' इति क्रियापदस्य समानार्थक-पदं चित्वा लिखत?**<br>**(1) क्षेत्रपरिमाणैः (2) इमानि**<br>**(3) वर्तन्ते (4) लघूनि** | |
| **8.** | **नित्यं वृद्धोपसेविनः .................. वर्धन्ते।**<br>**(1) चत्वाराः (2) द्वौ**<br>**(3) त्रीणि (4) चत्वारि** | |
| **9.** | **अस्माकं प्रथमोपग्रहस्य नाम किम् अस्ति?**<br>**(1) प्रथमोपग्रह: (2) आर्यभटः**<br>**(3) सिद्धान्तः (4) अचलः** | |

| | | |
|---|---|---|
| **10.** | **"मयूराणाम्" इत्यस्य समानार्थक-पदं किम्?**<br>**(1) शुकानाम्  (2) शिखीनाम्**<br>**(3) पिकानाम्  (4) काकानाम्** | |
| **11.** | **तस्याः स्वकीयम् अध्ययनमपि सहैव प्रचलति - अस्मिन् वाक्ये विशेष्यपदं किम्?**<br>**(1) सहैव  (2) प्रचलति**<br>**(3) स्वकीयम्  (4) अध्ययनम्** | |
| **12.** | **"मातृ शब्दः, तृतीया विभक्तिः, बहुवचनम्" इत्यस्य यथानिर्दिष्टं शब्दरूपं प्रदत्त-विकल्पेभ्यः चिनुत।**<br>**(1) मातृभ्यः  (2) मातृभिः**<br>**(3) मातरम्  (4) मातृभ्याम्** | |
| **13.** | **"लिख् धातुः, विधिलिङ्-लकारः, मध्यम-पुरुषः, एकवचनम्" इत्यस्य यथानिर्दिष्टं धातुरूपं प्रदत्त-विकल्पेभ्यः चिनुत।**<br>**(1) लिखसि  (2) लिख**<br>**(3) अलिखः  (4) लिखेः** | |
| **14.** | **"प्रवृत्तोऽपि" इत्यस्य सन्धि-विच्छेदं कुरुत।**<br>**(1) प्रवृत्तः+पि  (2) प्र+वृतः+ऽपि**<br>**(3) प्रवृत्तः+अपि  (4) प्रवृत्तो+पि** | |
| **15.** | **"73" इत्यस्य सङ्ख्यात्मक-अङ्कस्य कृते समुचित-संस्कृत-पदं चिनुत।**<br>**(1) त्रीषष्टिः  (2) त्रिसप्ततिः**<br>**(3) त्रीसप्ततिः  (4) त्र्यशीतिः** | |
| **16.** | **कर्तुम् इत्यस्य प्रकृति-प्रत्ययं पृथक् कुरुत।**<br>**(1) कृ+तुमुन्  (2) क्री+तुमुन्**<br>**(3) कर्+तुम्  (4) क्रि+तुमुन्** | |
| **17.** | **वयम् इत्यस्य पद-परिचयम्-**<br>**(1) अस्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्**<br>**(2) युष्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्।**<br>**(3) अस्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्।**<br>**(4) युष्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्।** | |
| **18.** | **अभवत इत्यस्य पद-परिचयम्-**<br>**(1) भू धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।**<br>**(2) भू धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।**<br>**(3) भव् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।**<br>**(4) भव् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।** | |
| **19.** | **"त्वम् पिबसि'' इत्येतं वाक्यं लृट्लकारे परिवर्तयत।**<br>**(1) त्वम् अपिबः  (2) त्वम् पिब**<br>**(3) त्वम् पास्यसि  (4) त्वम् पिबेः** | |
| **20.** | **"आगम्य" इत्यत्र उपसर्गं पृथक् कुरुत।**<br>**(1) आग्+अम्य  (2) आग+म्य**<br>**(3) आगम्+य  (4) आ+गम्य** | |

| | | |
|---|---|---|
| | **खण्ड 'ख'**<br>**पाठ्यपुस्तकाधारितप्रश्नाः** | **40 अङ्काः** |
| **प्रश्न-2.** | **अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्**<br>**गजधरा: वास्तुकाराः आसन्। कामं ग्रामीणसमाजो भवतु नगरसमाजो वा तस्य नव-निर्माणस्य सुरक्षाप्रबन्धनस्य च दायित्वं गजधराः निभालयन्ति स्म। नगरनियोजनात् लघुनिर्माणपर्यन्तं सर्वाणि कार्याणि एतेष्वेव आधृतानि आसन्। ते योजनां प्रस्तुवन्ति स्म, भाविव्ययम् आकलयन्ति स्म, उपकरणभारान् सगृह्णन्ति स्म। प्रतिदाने ते न तद् याचन्ते स्म यद् दातुं तेषां स्वामिनः असमर्थाः भवेयुः। कार्यसमाप्तौ वेतनानि अतिरिच्य गजधरेभ्यः सम्मानमपि प्रदीयते स्म। नमः एतादृशेभ्यः शिल्पिभ्यः।**<br>**(क) गजधराः के आसन्?**<br>**(ख) योजनां के प्रस्तुवन्ति स्म?**<br>**(ग) गजधराः प्रतिदाने किं याचन्ते स्म?**<br>**(घ) गजधरेभ्यः कदा वेतनानि सम्मानं च प्रदीयते स्म?** | **1×4=4** |
| **प्रश्न-3.** | **अधोलिखित-पठित-पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>**गुणा गुणज्ञेषु गुणा भवन्ति**<br>**ते निर्गुणं प्राप्य भवन्ति दोषाः।**<br>**सुस्वादुतोयाः प्रभवन्ति नद्यः**<br>**समुद्रमासाद्य भवन्त्यपेयाः।।**<br>**(क) गुणाः कुत्र भवन्ति?**<br>**(ख) गुणाः दोषाः कदा भवन्ति?**<br>**(ग) सुस्वादुतोयाः काः प्रभवन्ति?**<br>**(घ) समुद्रमासाद्य नद्यः कीदृशाः भवन्ति?** | **1×4=4** |
| **प्रश्न-4.** | **अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।**<br>**(क) सामाजिक कुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन् । एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्त्यः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमान सोढुं नाशक्नोत् ।**<br>**(ख) मनस्यागता ते इयं भावना परमकल्याणमयी परं सर्वे न तथा अवगच्छन्ति। अस्तु, अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत- जनजातिबहुलप्रदेशोऽयम्। गारो-खासी-नगा- मिजो-प्रभृतयः बहवः जनजातीयाः अत्र** | **4×1=4** |

| | | |
|---|---|---|
| | निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः, स्वलीला कलाभिश्च निष्णाताः सन्ति। | |
| प्रश्न-5. | अधोलिखित-पद्यांशेषु कस्यचिद् द्वयोः पद्यांशयोः हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।<br>(क) इयं शिल्पिनां यन्त्रविद्याधराणां<br>भिषक्शास्त्रिणां भूः प्रबन्धे युतानाम्।<br>नटानां नटीनां कवीनां धरेयं<br>क्षितौ राजते भारतस्वर्णभूमिः।।<br>(ख) यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः।<br>तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्।।<br>(ग) पुष्पपत्रफलच्छायामूलवल्कलदारुभिः ।<br>धन्या महीरुहाः येषां विमुखा यान्ति नार्थिनः ॥ | 4×2=8 |
| प्रश्न-6. | अधोलिखित-प्रश्नेषु केषाञ्चित् चतुर्प्रश्नानाम् उत्तराणि संस्कृत-भाषायां दीयन्ताम्।<br>(क) आर्यभटेन कः ग्रन्थः रचितः?<br>(ख) अत्र किं सदैव सुपूर्णमस्ति?<br>(ग) मार्गे किं दृष्ट्वा बालाः परस्परं वार्तालापं कुर्वन्ति?<br>(घ) का स्वदृढनिश्चयात् न विचलति?<br>(ङ) आत्मवशं किं भवति?<br>(च) सप्तभगिनी-प्रदेशे कः उद्योगः सर्वप्रमुखः? | 1×4=4 |
| प्रश्न-7. | अधोलिखित-प्रश्नेषु रेखाङ्कित-पदानि आधृत्य केषाञ्चित् चतुर्वाक्यानां प्रश्ननिर्माणं कुरुत।<br>(क) <u>वायुवेगः</u> सर्वथाऽवरुद्धः आसीत्।<br>(ख) तस्य <u>मूर्ध्नि</u> तिष्ठन्ति वायसाः।<br>(ग) सर्वाणि पत्राणि <u>चलदूरभाषयन्त्रे</u> सुरक्षितानि भवन्ति।<br>(घ) चञ्चलः <u>वृक्षम्</u> उपगम्य अपृच्छत्।<br>(ङ) <u>समयात्</u> पूर्वम् आयासं करोषि।<br>(च) <u>तयोः</u> नित्यं प्रियं कुर्यात्। | 1×4=4 |
| प्रश्न-8. | मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत-<br>[एव, खलु, तथा, पुरतः]<br>(क) विद्यालयस्य ........... एकम् उद्यानम् अस्ति।<br>(ख) सत्यम् ........... जयते।<br>(ग) किं भवान् स्नानं कृतवान् ...........?<br>(घ) सः यथा चिन्तयति ........... आचरति। | 1×4=4 |

| | | |
|---|---|---|
| प्रश्न-9. | संस्कृत-पाठ्यपुस्तकम् अधिकृत्य कमपि एकं श्लोकं हिन्दी-सरलार्थ-सहितम् लिख्यन्ताम्, यः श्लोकः परीक्षा-पत्रे न स्यात्। | 2+2=4 |
| प्रश्न-10. | संस्कृत-पाठ्यपुस्तकम् अधिकृत्य कस्याश्चित् एकस्याः कथायाः सारं हिन्दी भाषायां लिख्यताम्।<br>(क) कण्टकेनैव कण्टकम्<br>(ख) गृहं शून्यं सुतां विना | 4×1=4 |
| | **खण्ड 'ग'**<br>**व्याकरणभागः** | 40अङ्काः |
| प्रश्न-11. | अधोलिखितानां शब्दानां यथानिर्दिष्ट-शब्दरूपं लिखत।<br>(क) गणेश शब्दः, चतुर्थी विभक्तिः, एकवचनम्।<br>(ख) सीता शब्दः, षष्ठी विभक्तिः, द्विवचनम्।<br>(ग) अस्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्।<br>(घ) नदी शब्दः, सप्तमी विभक्तिः, एकवचनम्। | 1×4=4 |
| प्रश्न-12. | अधोलिखितानां धातूनां यथानिर्दिष्ट-धातुरूपं लिखत।<br>(क) भू धातुः,लट्-लकारः,उत्तम-पुरुषः,एकवचनम्।<br>(ख) दृश् धातुः,लृट्-लकारः,मध्यम-पुरुषः,बहुवचनम्।<br>(ग) गम् धातुः,लङ्-लकारः,प्रथम-पुरुषः,बहुवचनम्।<br>(घ) स्था धातुः,लोट्-लकारः,उत्तम-पुरुषः,द्विवचनम्। | 1×4=4 |
| प्रश्न-13. | अधोलिखितानां पदानां सन्धिपदं सन्धिविच्छेदपदं वा लिखत।<br>(क) लोकक्रीडासक्ता (ख) बहिः+आगत्य<br>(ग) एतेष्वेव (घ) विनय+उपेता | 1×4=4 |
| प्रश्न-14. | अधोलिखितानां सङ्ख्यात्मक-अङ्कानां कृते समुचित-संस्कृत-पदं लिखत।<br>(क) 25 (ख) 58<br>(ग) 89 (घ) 11 | 1×4=4 |
| प्रश्न-15. | अधोलिखितानां पदानां प्रकृतिप्रत्यययोः विभागं संयोजनं वा कृत्वा समुचित-पदं लिखत।<br>(क) करणीयम् (ख) सम्+पूज्+ल्यप्<br>(ग) त्यक्त्वा (घ) दृश्+तुमुन् | 1×4=4 |
| प्रश्न-16. | अधोलिखित-पदानां समुचितं पद-परिचयं विधीयन्ताम्।<br>(क) "द्रक्ष्यामः" (ख) "मात्रा"<br>(ग) "सेवते" (घ) "लताः" | 1×4=4 |
| प्रश्न-17. | अधोलिखितानां वाक्यानां यथानिर्दिष्टं लकार-परिवर्तनं कुरुत।<br>(क) अहम् गच्छामि। (लङ्लकारे)<br>(ख) ते गायन्तु। (लृट्लकारे) | 1×4=4 |

| | | |
|---|---|---|
| | (ग) यूयम् स्थास्यथ। (लोट्लकारे)<br>(घ) आवाम् अपश्याव। (लट्लकारे) | |
| प्रश्न-18. | प्रदत्त-विकल्पेभ्यः निर्देशानुसारं समुचितं विकल्पं चिनुत।<br>(क) संस्कृते कति कारकाणि सन्ति?<br>(ख) "अधिकरण" कारके का विभक्तिः?<br>(ग) "यूयम्" इति पदस्य कः अर्थः?<br>(घ) "पञ्चमी" विभक्तौ किम् ? | 1×4=4 |
| प्रश्न-19.<br>(1) | यथानिर्दिष्टं प्रश्नानाम् उत्तराणि लिख्यताम्।<br>अधोलिखित-विशेषणविशेष्यानाम् उचित-मेलनं कुरुत।<br>(क) मौखिकम् उपकारः<br>(ख) महान् भारते<br>(ग) मुद्राविहीनः ज्ञानम्<br>(घ) सम्पूर्णे विनिमयः | ½×4= 2 |
| (2) | अधोलिखित-पदेषु भिन्न-प्रकृतिकं पदं चिनुत।<br>(क) गच्छति, पठति, धावति, अहसत्, क्रीडति।<br>(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।<br>(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।<br>(घ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा। | ½×4= 2 |
| (3) | अधोलिखित-विलोम-पदानाम् उचित-मेलनं कुरुत।<br>(क) उदयः अस्थिरः<br>(ख) अचलः प्रकाशः<br>(ग) अन्धकारः चलः<br>(घ) स्थिरः अस्तम् | ½×4= 2 |
| (4) | अधोलिखित-समानार्थक-पदानाम् उचित-मेलनं कुरुत।<br>(क) जगति पृथ्वीम्<br>(ख) प्रकृतिः नेत्रेण<br>(ग) चक्षुषा स्वभावः<br>(घ) वसुन्धराम् संसारे | ½×4= 2 |

**आदर्शप्रश्नपत्र-प्रारूपम्**

**12 सितम्बर, 2024**

**कक्षा अष्टमी**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 100**

| | | |
|---|---|---|
| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | **20 अङ्काः** |
| **प्रश्न-1.** | **अधोलिखितानां विंशतिः प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत ।**<br>➢ **प्रथमे प्रश्ने विंशतिः बहुविकल्पात्मकाः प्रश्नाः भविष्यन्ति, तत्रापि आदौ एकः प्रश्नः संस्कृतस्य सामान्य-बिन्दूनां विषये भविष्यति ।**<br>➢ **अग्रिमाः दश प्रश्नाः "रुचिरा तृतीयो भागः" इत्येतम् अधिकृत्य भविष्यन्ति ।**<br>➢ **नव प्रश्नाः च व्याकरणम् अनुसृत्य भविष्यन्ति ।**<br>**<u>बहुविकल्पात्मक-प्रश्नाः</u>** | **1×20=20** |
| **(1)** | **प्रथमः प्रश्नः "सामान्य संस्कृतम्"संस्कृतस्य मूलभूत-परिचयात्मक-बिन्दूनां ज्ञानम् (लिङ्ग- विभक्ति- वचन- पुरुष- कारकादि विषयमधिकृत्य) ।** | |
| **(2)** | **2 तः 11 प्रश्नपर्यन्तम् "रुचिरा तृतीयो भागः"-**<br>➢ **द्वितीयः प्रश्नः पाठस्य नाम इति विषयम् अधिकृत्य भविष्यति ।**<br>➢ **त्रयः प्रश्नाः प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः भविष्यन्ति।**<br>➢ **त्रयः प्रश्नाः षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यःभविष्यन्ति ।**<br>➢ **त्रयः प्रश्नाः एकादश-पाठतः चतुर्दश-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः भविष्यन्ति।** | |
| **(3)** | **12 तः 20 प्रश्नपर्यन्तम् "व्याकरण-भागः"-**<br>**यथानिर्दिष्टं शब्दरूपम्, यथानिर्दिष्टं धातुरूपम्, सन्धि/सन्धि-विच्छेदम्, सङ्ख्यात्मक-अङ्काः, प्रकृति-प्रत्ययं पृथक्करणम्, शब्दरूपस्य पदपरिचयः, धातुरूपस्य पदपरिचयः, लकारपरिवर्तनम् तथा च उपसर्ग-पृथक्करणम् इति नव प्रश्नाः भविष्यन्ति।** | |
| | **खण्ड 'ख'**<br>**पाठ्यपुस्तकाधारितप्रश्नाः** | **40 अङ्काः** |
| **प्रश्न-2.** | **संस्कृत-पाठ्यपुस्तके निर्धारित- सम्पूर्ण- पाठ्यसामग्रीतः 40-50 शब्द-परिमितम् एकं पठित- गद्यांशम् अधिकृत्य संस्कृत- भाषायां चत्वारः सामान्य-सरलप्रश्नाः।** | **1x4=4** |
| **प्रश्न-3.** | **संस्कृत-पाठ्यपुस्तके निर्धारित- सम्पूर्ण- पाठ्यसामग्रीतः एकं पठित- पद्यांशम् अधिकृत्य संस्कृत-भाषायां चत्वारः सामान्य- सरलप्रश्नाः।** | **1x4=4** |

| | | |
|---|---|---|
| प्रश्न-4. | संस्कृत-पाठ्यपुस्तके निर्धारित- पाठ्यसामग्रीम् अधिकृत्य द्वयोः गद्यांशयोः एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादः। | 4x1=4 |
| प्रश्न-5. | संस्कृत-पाठ्यपुस्तके निर्धारित- पाठ्यसामग्रीम् अधिकृत्य त्रिषु पद्यांशेषु द्वयोः पद्यांशयोः हिन्दी-भाषायाम् अनुवादः। | 4x2=8 |
| प्रश्न-6. | संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य अभ्यासात् षट्-प्रश्नेषु चत्वारः प्रश्नाः करणीयाः। | 1x4=4 |
| प्रश्न-7. | सम्पूर्ण-पाठ्यपुस्तकात् निर्धारित-पाठ्यसामग्रीम् अधिकृत्य अभ्यासात् षट्-वाक्येषु चतुर्णां वाक्यानां प्रश्न-निर्माणम्। | 1x4=4 |
| प्रश्न-8. | सम्पूर्ण-पाठ्यपुस्तकात् निर्धारित- पाठ्यसामग्रीम् अधिकृत्य अभ्यासात् चतुर्णां वाक्यानां रिक्तस्थानपूर्तिः। | 1x4=4 |
| प्रश्न-9. | संस्कृत-पाठ्यपुस्तके निर्धारित-सम्पूर्ण-पाठ्यसामग्रीम् अधिकृत्य एकं श्लोकं हिन्दी-अर्थसहितम्। | 2+2=4 |
| प्रश्न-10. | सम्पूर्ण-पाठ्यपुस्तकात् हिन्दी-भाषायाम् एकस्याः कथायाः सारः। | 4x1=4 |
| | खण्ड 'ग'<br>व्याकरणभागः | 40अङ्काः |
| प्रश्न-11. | शब्दरूपाणि | 1x4=4 |
| प्रश्न-12. | धातुरूपाणि | 1x4=4 |
| प्रश्न-13 | सन्धि-कार्यम् {सन्धिं/सन्धि-विच्छेदं वा} (सम्पूर्ण-पाठ्यपुस्तकमधिकृत्य एव) | 1x4=4 |
| प्रश्न-14. | संख्यात्मकशब्दाः (1 तः 100 पर्यन्तम्)। | 1x4=4 |
| प्रश्न-15. | प्रत्ययाः {प्रकृति-प्रत्यययोः संयोजनं विभागं वा} (सम्पूर्ण-पाठ्यपुस्तकमधिकृत्य एव सामान्य प्रत्ययाः)। | 1x4=4 |
| प्रश्न-16. | पद-परिचयः (शब्दानां धातूनां च) | 1x4=4 |
| प्रश्न-17. | लकार परिवर्तनम् (केवलं लट्-लृट्-लोट्-लङ्-लकारेषु ) | 1x4=4 |
| प्रश्न-18. | संस्कृतभाषा-सम्बन्धिताः सामान्य-प्रश्नाः<br>(तत्र अधोलिखित-विषयान् अधिकृत्य प्रश्नाः भविष्यन्ति )<br>➢ कति वचनानि? कति लिङ्गानि? कति पुरुषाः? कति विभक्तयः? कति कारकाणि? इत्यादयः सामान्य प्रश्नाः।<br>➢ कारक-विभक्त्योः सम्बन्धिनः सामान्य प्रश्नाः<br>➢ सामान्य-सर्वनाम-पदानां हिन्दी-भाषायाम् अर्थः।<br>➢ उपसर्गाणां धातूनां च पृथक्करणम् (द्वाविंशतिः उपसर्गाः)। | 1×4=4 |

| | | |
|---|---|---|
| प्रश्न-19. | संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्र्याः अभ्यासमधिकृत्य चतुर्णां विषयाणां मेलनम्। अभ्यासेषु एतादृशाः अनेके विषयाः सन्ति, तद्यथा-<br>➢ पर्यायपदानां (समानार्थक-पदानां) मेलनम्।<br>➢ विलोमपदानां (विपरीतार्थक-पदानां) मेलनम्।<br>➢ विशेषण-विशेष्यानां मेलनम्।<br>➢ कोष्ठकात् चित्वा पदानाम् अर्थः।<br>➢ शुद्ध-कथनानां समक्षम् "आम्" इति तथा अशुद्ध-कथनानां समक्षम् "न" इति लेखनम्।<br>➢ कोष्ठकात् शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिः ।<br>➢ वाक्येभ्यः अव्ययपदचयनम् ।<br>➢ भिन्न-प्रकृति-चयनम् ।<br>➢ कर्तृपद-चयनम् ।<br>➢ क्रियापद-चयनम् ।<br>➢ उपसर्ग-धातु-पृथक्करणम् ।<br>➢ श्लोकांश योजनम्, श्लोकांश मूर्तिः च ।<br>➢ तत्सम पदानि (पाठ्यपुस्तकस्य अभ्यासेषु एव) । | 2×4=8 |

◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊◊